# जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

**पेजावरअधोक्षजमठः,उडुपी**

## अनुग्रहसन्देशः

श्रीमद्भागवतस्य भागवतस्य महिमानम् अज्ञात्वा तस्य प्रवेशः सुकरो न भवति। अतः भागवतस्य अलौकिकं महिमानं प्रकाशयन् "भागवतमाहात्म्यम्" इति ग्रन्थः सम्प्रति प्रकाश्यते इति ज्ञात्वा वयं भृशं मोदामहे।

विशेषतः पाद्मपुराणे तथा स्कान्दपुराणे तन्त्रशास्त्रेषु च भागवतस्य माहात्म्यं सविस्तरं वर्णितमस्ति। एताः कथाः न केवलम् ऐतिहासिक्यः, अपि त्वस्माकम् आन्तरिकसाधनायाः, तत्त्वज्ञानस्य च रहस्यं बोधयन्ति।

गोकर्णकथायाः सन्देशस्त्वयम् - अत्र वंशस्तम्भः (वेणुः) अस्माकम् अहङ्कारस्य, भौतिकदेहस्य च सङ्केतः। तत्रत्यानि सप्त पर्वाणि (ग्रन्थयः) अस्मदीयाः काम-क्रोध-लोभ-मोह-मद-मात्सर्य-अज्ञानाख्याः सप्त ग्रन्थयः । यदि दुराचारोपि मनुष्यः सविधि श्रद्धया भागवतश्रवणं करोति, तर्हि तन्नामामृतं हृदयग्रन्थिभेदं कृत्वा, तं जननमरणचक्रात् विमुच्य, भगवतः सन्निधिं प्रापयति इति भागवतस्यापारः महिमा।

अस्य ग्रन्थस्य सम्पादकानां, प्रकाशकानां, तथा श्रद्धया अस्य पठनादि च कुर्वतां सर्वेषामपि श्रीमन्मध्ववल्लभ-श्रीकृष्णस्य, अस्माकम् उपास्यमूर्तेः श्रीरामविट्ठलस्य च पूर्णानुग्रहः सदा भूयात् इति नारायणस्मरणपूर्वकं सानुग्रहं प्रार्थयामहे।

**इत्यनेकनारायणस्मरणानि**

**श्रीविश्वप्रसन्नतीर्थश्रीपादाः**

# निदेशकवचनम्

भागवतामृतरसस्य पाने योग्यतां, श्रद्धां च जनयितुं भागवतस्य महिम्नः ज्ञानम् अत्यन्तम् आवश्यकम् । अतः एव अद्य 'वेदवेदान्ताध्ययनशोधसंस्थानेन' श्रीमद्भागवतस्य महिमानं प्रकटीकुर्वन् अयं "भागवतमाहात्म्यम्" इति ग्रन्थः विदुषां, भक्तानां च पुरतः सोत्साहं समुपस्थाप्यते ।

अस्मिन् ग्रन्थे पाद्म-स्कान्दपुराणाद्यन्तर्गत-माहात्म्यस्य अपूर्वः सङ्ग्रहः वर्तते । अत्रत्याः कथाः केवलम् आख्यायिकाः न सन्ति, अपि तु मानवानां हृदयग्रन्थिभेदनस्य, अज्ञाननाशस्य च तात्त्विकं सन्देशं ददति । पाद्मपुराणोक्ता कथा 'भक्तिरेव ज्ञानवैराग्ययोः जननी' इति बोधयति । भगवत्प्रेम्णा विना शुष्कं ज्ञानं, वैराग्यं च जीवस्य उद्धाराय न कल्पते इति अत्रत्यः सन्देशः । तथैव स्कान्दपुराणोक्ता धुन्धुकारिणः कथा 'भागवतश्रवणेन अहङ्काररूपिणः वंशस्तम्भस्य (वेणोः) सप्तग्रन्थीनां भेदनं भवति' इति महत्तत्त्वं प्रकाशयति ।

एतादृशस्य तत्त्वज्ञानपूर्णस्य ग्रन्थस्य प्रकाशनं संस्थायाः महद्भाग्यम् । अस्य पुनीतकार्यस्य कृते स्वकीयम् 'अनुग्रहसन्देशं' प्रदाय अस्मान् अनुगृहीतवद्भ्यः, अस्माकं मार्गदर्शकेभ्यः, श्रीपेजावरमठाधीश्वरेभ्यः उडुपी-श्रीकृष्णपूजापर्याय पीठाधीश्वरेभ्यः परमपूज्य श्रीश्रीविश्वप्रसन्नतीर्थश्रीचरणेभ्यः संस्थायाः पक्षतः सविनयं साष्टाङ्गप्रणामान्, कृतज्ञतां च निवेदयामि ।

तथैव, अस्य ग्रन्थस्य सम्पादनकार्यं महता परिश्रमेण कृतवद्भ्यः विद्वद्भ्यः श्रीप्रदीपसिंहाचार्येभ्यः अभिनन्दनानि । तेषां इयं निस्वार्थशास्त्रसेवा सर्वथा श्लाघनीया ।अनेन ग्रन्थेन वाचकवृन्दस्य हृदये भागवतं प्रति दृढा भक्तिः, तत्त्वजिज्ञासा च उत्पद्यताम् इति श्रीहरिगुरुचरणौ प्रार्थये ।

**डा. विठोबाचार्यः**

# सम्पादकीयम्

शुकमुखामृतद्रवसंयुतं श्रीमद्भागवतं नाम परमहंसानां संहिता, कलियुगे मोक्षसाधकानां कृते साक्षात् कल्पवृक्षश्च वर्तते। अस्य महाग्रन्थस्य रसपानात् पूर्वं तस्य अलौकिकं महिमानं ज्ञातुं तन्माहात्म्यश्रवणम् अत्यन्तम् आवश्यकम्। अद्य 'वेदवेदान्ताध्ययनशोधसंस्थानेन' प्रकाश्यमानः अयं "भागवतमाहात्म्यम्" इति ग्रन्थः न केवलं पाद्म-स्कान्दपुराणयोः कथाभिः युक्तः, अपि तु कैश्चित् अपूर्वैः, विरलैः गौरीतन्त्र-कौशिकसंहिताद्युक्तमाहात्म्यैरप्यलङ्कृतः सन् सहृदयानां पुरतः समुपतिष्ठते।

अस्मिन् ग्रन्थे सर्वविदितस्य पाद्मपुराणोक्तेन तथा (भक्ति-ज्ञान-वैराग्याणां कथा), स्कान्दपुराणोक्तेन (गोकर्ण-धुन्धुकारिणोः कथा) माहात्म्येन साकं, इतोऽपि द्वे अपूर्वे माहात्म्ये सविस्तरं सम्पादिते स्तः -

१. कौशिकसंहितोक्तं भागवतमाहात्म्यम्:

कौशिकसंहितायां वर्णितं माहात्म्यम् अत्यन्तं नियमप्रधानं, साधनमार्ग-दर्शकं च वर्तते। अत्र भागवतपठनस्य क्रियमाणानि आह्निकानि, श्रवणस्य नियमाः, तथा वक्तुः श्रोतुश्च लक्षणानि अतीव सूक्ष्मया दृष्ट्या निरूपितानि सन्ति। "कलियुगे भगवत्प्राप्तये भागवतमेव अमोघं साधनम्" इति दृढयन् अयं भागः, सप्ताहरूपेण, मासरूपेण वा भागवतश्रवणं कथं करणीयम् इति शास्त्रोक्तं विधिं स्पष्टीकरोति।

२. गौरीतन्त्रोक्तं भागवतमाहात्म्यम्:

अस्य ग्रन्थस्य अन्यद् विशिष्टम् आकर्षणं नाम गौरीतन्त्रोक्तं माहात्म्यम्। तन्त्रशास्त्रदृष्ट्या भागवतं न केवलं कथाग्रन्थः, अपितु साक्षात् 'मन्त्रस्वरूपः'। गौरीतन्त्रे भागवतस्य द्वादशस्कन्धानां मन्त्रात्मकं रहस्यं, एकैकस्य श्लोकस्य

जपेन उत्पद्यमाना आध्यात्मिकशक्तिः, कुण्डलिनीजागरणे तस्य प्रभावश्च अतीव गूढतया निरूपितः। भागवतस्य पारायणेन आन्तरिकशुद्धिः, पापक्षयश्च कथं भवतीति अत्र सुष्ठु विवृतम्।

एतादृशानां विरलानां, गूढार्थानां च ग्रन्थानां सम्पादनं न सुकरम्। कौशिकसंहितायाः, गौरीतन्त्रस्य च सङ्ग्रहः अपूर्वोत्र। अनेन सम्पादनकार्येण भागवतप्रतिपाद्यश्रीकृष्णः प्रीतो भवत्विति प्रार्थये

कृतज्ञतासमर्पणम्:

सम्पादनादिकर्मणि प्रेरणास्रोतोभूताः माम् अनुगृह्य आशिषं दत्तवन्तः मद्गुरवः श्रीपेजावरमठाधीश्वराः, परमपूज्य श्रीश्रीविश्वप्रसन्नतीर्थश्रीचरणाः। तेषां "ज्ञानसङ्ग्रहः, शास्त्रसंरक्षणं च भवेत्" इति आज्ञाम् सदा शिरसा वहामि। तेषां पादपद्मयोः सश्रद्धं साष्टाङ्गप्रणामान् समर्पयामि।

तथैव, अस्य विरलग्रन्थस्य सम्पादनसेवावसरं दत्तवद्भ्यः, सर्वदा प्रोत्साहनं कुर्वद्भ्यः 'वेदवेदान्ताध्ययन-शोधसंस्थानस्य' निदेशकेभ्यः विद्वान् श्रीविठोबाचार्येभ्यः सविनयं कार्तज्ञ्यं निवेदयामि। अनेन अपूर्वग्रन्थराजस्य परिशीलनेन वाचकानां भागवतपाराणादिकर्मणि प्रीतिः, भगवति भक्तिः, ज्ञानं, विषयेषु वैराग्यं च वर्धताम्, श्रीहरिवायुगुरुचरणानां अनुग्रहश्च सदा भवेत् इति प्रार्थये।

विद्वद्वशंवदः
सि.आर्. प्रदीपसिंहाचार्यः चतुर्वेदः

# विषयानुक्रमणिका


पद्मपुराणान्तर्गतं श्रीमद्भागवतमाहात्म्यम् 1

अथ प्रथमाध्यायः 1

अथ द्वितीयाध्यायः 9

अथ तृतीयाध्यायः 17

अथ चतुर्थाध्यायः 24

अथ पञ्चमाध्यायः 33

अथ षष्ठाध्यायः 41

स्कान्दपुराणान्तर्गतं श्रीमद्भागवतमाहात्म्यं

प्रथमाध्यायः 53

द्वितीयाध्यायः 57

तृतीयोऽध्यायः 61

चतुर्थाध्यायः 68

कौशिकसंहितीयं श्रीमद्भागवतमाहात्म्यं

प्रथमाध्यायः 74

द्वितीयाध्यायः 77

तृतीयाध्यायः 84

गौरीतन्त्रोक्तं श्रीमद्भागवतमाहात्म्यम्

प्रथमः पटलः 116

द्वितीयः पटलः 118

तृतीयः पटलः 121

चतुर्थः पटलः 124

ततो योगबलेनैव दृष्ट्वा भागवतस्मृतिम् ॥ ४४ ॥
पुत्रस्य पूर्व संस्करान् व्यासः श्लोकान्पपाठ ह ।
श्रीमद्भागवतस्यैव दशमस्कन्धसम्भवान् ॥ ४५ ॥
श्रुत्वा पूर्वं श्रुताञ्श्लोकाँस्त्यक्तकीरवपुर्मतिः ।
हरेर्गुणाक्षिप्तमतिर्बादरायणनन्दनः ॥ ४६ ॥
तमेवानुजगामाथ हर्पितः कृष्णलीलया ।
आगत्य श्रीभागवतमद्यैष्ट पितुरात्मनः ॥ ४७ ॥
छायाशुकं विनिर्माय पित्रे दत्त्वा ततोऽभ्यगात् ।
अनग्निश्चानिकेतश्च पूर्वनाम्ना चकार ह ॥ ४८ ॥
शुकाख्येन मुने लोके स्मरन्भागवतं मुदा ।
यदा शमीकतनयः शापं शृङ्गी ददौ रुषा ॥ ४९ ॥
राज्ञे परीक्षिते विप्रस्तदायाद्योगिनां वरः ।
गङ्गातीरोपविष्टाय त्यक्तराज्याय सत्तमः ॥ ५० ॥
वक्तुं भागवतं शास्त्रं सद्यश्चित्तप्रसादकम् ।
यच्छ्त्वा कृष्णसायुज्यमभिमन्युसुतो नृपः ॥
ऋषीणां पश्यतामेव लेभे व्याससुतान्मुनेः ॥ ५१ ॥

सूत उवाच-

अहं तत्र निविष्टश्च श्रुतवान्मुनिसत्तमात् ।
श्रीमद्भागवतं विप्राः सर्वेष्टफलदायकम् ॥
तत्प्रभृत्येव लोकेस्मिन्नाविर्भूतं न संशयः ॥ ५२ ॥
भाशब्दः कीर्तिवचनो गशब्दो ज्ञानवाचकः ।
सर्वेष्टवचनो वश्च तो विस्तारस्य वाचकः ॥ ५३ ॥

अनेकजन्मसंसिद्धौ शिवो भवति यो नरः ॥ १० ॥
श्रीभागवतशुश्रूषा तस्यैव हृदि धार्यते ।
कोटिजन्मान्तरे येषामशुभं कर्म भामिनि ॥ ११ ॥
तेषां गतिर्न वै गौरि श्रीभागवतनामतः ।
स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥ १२ ॥
सर्वशास्त्रावगाही स यो भागवतचिन्तकः ।
तस्य दर्शनमात्रेण दूरतो याति पातकम् ॥ १३ ॥
किं तस्य दानैः पुरुभिर्मखैर्वा
किं तस्य पुण्यैश्चिरसञ्चितैर्वा ।
किं तस्य शास्त्रैः किमु तस्य योगैः
किं तस्य मैत्र्या किमु तस्य जाप्यैः ॥ १४ ॥
किं तस्य बुद्ध्या किमु तस्य शुद्ध्या
किं तस्य ऋद्ध्या बत शैलपुत्रि ।

यस्याऽनिशं श्रोत्रपवित्रभाग-

वतामृताम्भोधिरसावगाहः ॥ १५ ॥
दुर्लभं मानुषं जन्म लब्ध्वाऽपि भुवि मानवाः ।
श्रीमद्भागवतास्वादरहितास्ते जना वृथाः ॥ १६ ॥
कीर्तयन्ति च ये भक्त्या भागवतं धरात्मजे ।
तन्नाम कीर्तयन्त्येव सर्वे देवा महर्षयः ॥ १७ ॥
षड्शास्त्रवेत्ता निगमप्रवीणस्तथागमव्याकरणादिनिष्ठः ।

एकादशस्य श्रवणात् ज्ञानविज्ञानभक्तिमान् ।
द्वादशश्रवणाद्देवि आश्रयं लभते नरः ॥ ११ ॥

बहुना किमिहोक्तेन सर्वं सर्वत्र तिष्ठति ।
केवलं श्रीहरेर्भक्तिर्महाफलमिति ध्रुवम् ॥ १२ ॥

श्रीभागवतमाहात्म्यं वक्तुं कः शक्नुयात् प्रिये ।
यथा गुणा भगवतस्तथा भागवतस्य च ॥ १३ ॥

कर्मप्रधानं प्रवदन्ति केचित् ज्ञानप्रधानं प्रवदन्ति चाऽन्ये ।
अत्रैव भद्रे निजवासनातः परम्परा चाऽत्र भवानि भक्तिः ॥ १४ ॥

यस्य या वासना गौरि तस्य सा दुरतिक्रमा ।
सिताक्तं निम्बपत्रं च मधुरं न भवेत् क्वचित् ॥ १५ ॥

श्रोतव्यं रसिकादेव वक्तव्यं रसिकाग्रतः ।
स्ववासनानुसारेण विविधं च यथा मनः ॥ १६ ॥

नियमेन च नित्यं हि शृणुयाद्यः शुभानने ।
तस्य विघ्ने समुत्पन्नेऽनुतापः फलदो भवेत् ॥ १७ ॥

यो वक्ति श्रीभागवतं स ज्ञेयः श्रीशुकः स्वयम् ।
अन्यथा पर्वतसुते को वक्तुं शक्तिमान् भवेत् ॥ १८ ॥

शुकास्यपुटसङ्गित्वात्स्वादु भागवतं फलम् ।
शुकवद्वदते शास्त्रं शुकस्तेन निगद्यते ॥ १९ ॥

अथवा शुक्रमथनाज्जातः शुक इतीरितः ।
किं वा शुक्रस्वरूपत्वाच्छुक इत्यभिधीयते ॥ २० ॥

सर्वज्ञाननिधित्वाच्च स ऋषिः परिकीर्तितः ।
यमुनाया एकदेशे बादरं वनमस्ति हि ॥ २१ ॥

